# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. FIRST SEMESTER EXAMINATION, DECEMBER 2019**

**FIRST YEAR (BATCH 2019-22)**

**SANSKRIT (Honours)**

Date : 13/12/2019

Time : 11 am – 1 pm

Paper : **II [CC2]**

Full Marks : 50

1a. **एक:** प्रश्न: समाधेय:। 1 × 10

(क) राजानो धूर्तै: कथंकारं प्रतार्यन्ते ? प्रतार्यमाणानां तेषामाचरणं कीदृशं भवति – सर्वं पाठ्यांशानुसारं वर्णनीयम्।

(ख) बाणभट्टस्य रचनाशैली लिख्यताम्।

1b. वङ्गभाषया **एकस्य** अनुच्छेदस्य अनुवाद: कार्य:। 1 × 4

(क) गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानमनुपजातपलितादिवैरूप्यमजरं वृद्धत्वमनारोपितमेदोदोषं गुरुकरणमसुवर्णविरचनमग्राम्यं कर्णाभरणमतीतज्योतिरालोको नोद्वेगकर: प्रजागर:।

(ख) तात चन्द्रापीड। विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं च निसर्गत एवाभानुभेद्यमरत्नालोकच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमद:।

1c. **एक:** सन्दर्भ: सप्रसङ्गं व्याख्यायताम्। 1 × 6

(क) गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वं चेति महतीयं खल्वनर्थपरम्परा।

(ख) यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति।

2a. **एक:** प्रश्न: समाधेय:। 1 × 10

(क) हितोपदेशग्रन्थ: केन विरचित: ? अत्र अवान्तरविभागा: के ? कस्मिन् विभागे काककूर्ममृगमूषककथा समुपलभ्यते ? कथेयं स्वीयशैल्या समुपस्थापनीया। (1+2+0.5+6.5)

(ख) हितोपदेशानुसारं व्याघ्रपथिककथा समुपवर्ण्यताम्।

2b. **एकस्य** श्लोकस्य अनुवाद: कार्यो वङ्गभाषया आङ्गलभाषया वा। 1 × 4

(क) तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन।।

(ख) पर्जन्य इव भूतानामाधार: पृथिवीपति:।
विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ।।

2c. **एक:** श्लोक: सप्रसङ्गं व्याख्येय:। 1 × 6

(क) सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणा:।
अतीत्य हि गुणान् सर्वान् स्वभावो मूर्ध्नि वर्तते।।

(ख) दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं विदु:।।

3a. यथेच्छं **द्वयस्य** पादपूरणं कार्यम्। 2 × 2½

(क) दुष्टा भार्या शठं मित्रं ....।

(ख) अतिदर्पे हता लङ्का....।

(ग) यस्मिन् देशे न सम्मानो...।

(घ) मनसा चिन्तितं कर्म...।

3b. **एका** व्याख्या कार्या। 1 × 5

(क) आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धव:।।

(ख) विद्वत्त्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।।

———— × ————